श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

॥ द्वन्द्वपद्धतिः चतुर्विंशी ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

॥ द्वन्द्वपद्धतिः चतुर्विंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

प्रपद्ये पादुकारूपं प्रणवस्य कलाद्वयम्।
ओतं मितमिदं यस्मिन् अनन्तस्यापि तत्पदम्॥ **24.1** ॥

मणिपादुकयोर्युगं मुरारेः
मम नित्यं विदधातु मङ्गळानि।
अधिकृत्य चराचरस्य रक्षाम्
अनुकम्पाक्षमयोरिवावतारः॥ **24.2** ॥

चरणौ मणिपादुके! मुरारेः
प्रणतान् पालयितुं प्रपद्यमानम्।
विपदामिह दैवमानुषीणां
प्रतिकारं युवयोर्द्वयं प्रतीमः॥ **24.3** ॥

मुरभिन्मणिपादुके! भवत्योः
विहितो नूनमसौ मिथो विभागः।
भजतामपरस्परप्रियाणाम्
अविरोधाय सुरासुरेश्वराणाम्॥ **24.4** ॥

अहितोन्मथनाय संश्रितानाम्
अलमालोकवशेन शब्दतो वा।

करयोश्च रथाङ्गपाञ्चजन्यौ
मधुहन्तुः पदयोश्च पादुके ये ॥ **24.5** ॥

अवधीरितसाधुपद्धतीनाम्
अलसानां मधुवैरिपादुके द्वे।
इतरेतरसाहचर्यमित्थं
प्रतिपन्ने इव दैवपौरुषे नः ॥ **24.6** ॥

पार्श्वयोः सरसिजावसुन्धरे
पादयोश्च मणिपादुके ! युवाम्।
सन्निकर्षथ न चेन्मधुद्विषः
किं करिष्यति कृतागसां गणः ॥ **24.7** ॥

पादुके ! भवभयप्रतीपयोः
भावयामि युवयोः समागमम्।
सक्तयोर्दनुजवैरिणः पदे
विद्ययोरिव परावरात्मनोः ॥ **24.8** ॥

रङ्गसीमनि रथाङ्गलक्ष्मणः
चिन्तयामि तपनीयपादुके !।
शापदोषशमनाय तत्पदे
चक्रवाकमिथुनं कृतास्पदम् ॥ **24.9** ॥

मानयामि जगतस्तमोपहे
माधवस्य मणिपादुके ! युवाम्।
दक्षिणोत्तरगतिक्रमोचिते
पद्धती इव मयूखमालिनः ॥ **24.10** ॥

रङ्गनाथपदयोरलङ्क्रिया
राजते कनकपादुकाद्वयी।

तद्विभूतियुगळीव तादृशी
छन्दतः समविभागमाश्रिता ॥ **24.11** ॥

साक्षात्पदं मधुभिदः प्रतिपादयन्त्यौ
मानोपपत्तिनियते मणिपादुके द्वे।
अन्योन्यसङ्गतिवशादुपपन्नचर्याम्
आज्ञां श्रुतिस्मृतिमयीमवधारयामि ॥ **24.12** ॥

विश्वोपकारमधिकृत्य विहारकाले -
ष्वन्योन्यतः प्रथममेव परिस्फुरन्त्योः।
दृष्टान्तयन्ति युवयोर्मणिपादरक्षे !
दिव्यं तदेव मिथुनं दिविषन्निषेव्यम् ॥ **24.13** ॥

द्वावेव यत्र चरणौ परमस्य पुंसः
तत्र द्विधा स्थितवती मणिपादुके ! त्वम्।
यत्रैव दर्शयति देवि ! सहस्रपात्त्वं
तत्रापि नूनमसि दर्शिततावदात्मा ॥ **24.14** ॥

पर्यायतो गतिवशान्मणिपादरक्षे !
पूर्वापरत्वनियमं व्यतिवर्तयन्त्यौ।
मन्ये युवां महति विष्णुपदे स्फुरन्त्यौ
सन्ध्ये समस्तजगतामभिवन्दनीये ॥ **24.15** ॥

अश्रान्तसञ्चरणयोर्निजसम्प्रयोगात्
अम्लानतां चरणपङ्कजयोर्दिशन्त्यौ।
मान्ये युवां रघुपतेर्मणिपादरक्षे !
विद्ये बलामतिबलां च विचिन्तयामि ॥ **24.16** ॥

अन्तर्मोहादविदितवतामात्मतत्त्वं यथावत्
पद्यामित्थं परिचितवतां पादुके ! पापलोक्याम्।

नित्यं भक्तेरनुगुणतया नाथ पादं भजन्त्यौ
निष्ठे साक्षात् स्वयमिह युवां ज्ञानकर्मात्मिके नः ॥ **24.17** ॥

न्यस्तं विष्णोः पदमिह महत् स्वेन भूम्ना वहन्त्योः
आम्नायाख्यामविहतगतिं वर्तयन्त्योर्निजाज्ञाम्।
आसन्नानां प्रणयपदवीमात्मना पूरयन्त्योः
द्वैराज्यश्रीर्भवति जगतामैकराज्ये भवत्योः ॥ **24.18** ॥

अप्राप्तानामुपजनयथः सम्पदां प्राप्तिमेवं
सम्प्राप्तानां स्वयमिह पुनः पालनार्थं यतेथे।
साक्षाद्रङ्गक्षितिपतिपदं पादुके ! साधयन्त्यौ
योगक्षेमौ सुचरितवशान्मूर्तिमन्तौ युवां नः ॥ **24.19** ॥

बद्धहरिपादयुगळं युगळं तपनीयपादुके ! युवयोः।
मोचयति संश्रितानां पुण्यापुण्यमयशृङ्खलायुगळम् ॥ **24.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे द्वन्द्वपद्धतिः चतुर्विंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥